# Bharatiya-Yuddha-Virah

# ભારતીય-યુદ્ધવીરાઃ

## Document Information

Text title : Bharatiya-Yuddha-Virah

File name : bhAratIyayuddhavIrAH.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Patriotic Sanskrit Poem

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : November 21, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# ભારતીય-યુદ્ધવીરાઃ

હે ભારતીય-સઙ્ગ્રામ-વીર-વર્ગાઃ !
સ્વીય-પ્રાણોત્સર્ગૈઃ સમલઙ્કૃત-સ્વર્ગાઃ !
કૃતે સમેષાં ભવતાં
નાનાશસ્ત્રચાલનૈ-ર્ભારત-રાષ્ટ્રં સમવતાં
ભારતીયા ભ્રાતૃ-ભગિની-સમુદાયાઃ
સમુચ્ચારિત-કરુણ-વિદાયાઃ
પ્રશંસન્તિ, વિલપન્તિ, આલપન્તિ,
ગર્વમનુભવન્તિ, જલ્પન્તિ
સ્મૃતિ-વિનમ્ર-મસ્તકાઃ
કૃતજ્ઞાઃ સ્વદેશ-હિત-ચિન્તકાઃ ॥

વૈરિ-સન્તપ્તાયા માતૃભૂમ્યાઃ સુરક્ષાર્થં
પરિત્યક્ત-વૈયક્તિક-સુખ-સાર્થં
અન્તક-ભીતિં ન ચિન્તયન્તઃ
અમૃતત્વં યે પ્રાપ્તવન્તઃ
જન્મદાયા વસુધાયા વર-સન્તાનાઃ
શૌર્ય-સૂર્ય-રશ્મિ-રાશિં દધાનાઃ
ભારત-માતુઃ સવિજય-ગાનમ્
ભવન્તો નમસ્યાઃ સુચિર-વન્દ્યાઃ સસમ્માનમ્ ॥

વિષ-કુમ્ભાઃ પયોમુખાઃ પ્રતિવેશિનઃ
વર્વરાચરણા અવિશ્વાસિનઃ
અન્યેષામનિષ્ટં ચિન્તયન્તઃ પશ્ચાત્પદાઃ
નિવૃત્તા ભીતિ-ત્રસ્તા નિરસ્ત-મદાઃ ॥

સત્કર્ત્તવ્યાચરણાર્થં કૃત-શપથાઃ
નિર્ભયં સમાશ્રિત-મૃત્યુ-પથાઃ

માતૃસેવાયાં ભવન્ત આહુતીકૃતાસવઃ
ત્યક્ત-રક્તા દેશ-ભક્ત-પ્રવરાઃ સદ્બન્ધવઃ ॥

હે જન્મભૂમિ-માન-ધન-બોધાઃ
દુષ્ટારાતિ-નિપાતનાઃ
ધૃતાયુધા અપરાજેય-યોધાઃ
સિંહ-સંહતિ-સમ્પન્નાઃ !
નિવેદ્યન્તે ભવત્કૃતે સમેષામસ્માકમ્
સજલાઃ શ્રદ્ધાઞ્જલયઃ સનમોવાકમ્ ॥

– રચયિતા : ડૉ હરેકૃષ્ણ-મેહેરઃ

Copyright Dr.Harekrishna Meher

---

*Bharatiya-Yuddha-Virah*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*